श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनयिनाराचार्य विरचितम्

# ॥ श्रीमद्वेदान्तदेशिक विग्रहध्यानम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक विग्रहध्यानम् ॥

श्रीमल्लक्ष्मण योगीन्द्र सिद्धान्त विजयध्वजम्।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे॥

मनः प्रसूनस्तबकं मदीयं नाथस्य कौतूहलमातनोतु।
बिभर्ति यो भागवतेषु सर्वतन्त्रस्वतन्त्रेषु च पारतन्त्र्यम्॥ १ ॥

श्रीवादिहंसांबुद देशिकेन्द्र पादांबुज द्वन्द्व परागदैवम्।
श्रीवेङ्कटेशं गुरुसार्वभौमं चेतश्चिरं भावय सौम्यरूपम्॥ २ ॥

श्रीमत्त्रयीशेखर देशिकस्य श्रीवेङ्कटेशस्य वपुर्मनोज्ञम्।
आदित्यवर्णं विशदं ममाक्ष्णोः आपादचूडापदमाविरस्तु॥ ३ ॥

निर्निद्रपङ्केरुहयुग्मशोभा निराकृतिप्रौढपदाब्जयुग्मम्।
नीरन्ध्र निर्यन्नखचन्द्रचन्द्रा तपस्फुटद्ध्यातृहृदन्धकारम्॥ ४ ॥

निजार्थचन्द्रोपमितालकोद्यन् निरन्तरोद्भासि सितोर्ध्वपुण्ड्रम्।
सितायतस्वच्छसरोजबन्धं मुनेः शठारेरिव मूर्तिभेदम्॥ ५ ॥

मुखेन्द्वधः पाति करोत्कराकृति स्फुटच्छविश्मश्रुपरिष्कृतोरसम्।
सितोपवीतं तुलसीसरोरुह अक्षमालिकालङ्कृतचारुकन्धरम्॥ ६ ॥

अनङ्ग सौवर्ण निषङ्गकान्ति प्रसङ्गभङ्गावह चारुजङ्घम्।
लसत्ककुद्मत्ककुदाभिरूप्य नितान्तनिर्भासितजानुयुग्मम्॥ ७ ॥

रम्भावरस्तम्भ विजृम्भमाण दुर्गर्वसर्वङ्कष सक्थिदृश्यम्।
कटीतटश्लिष्टपवित्रशुभ्रान्तरीयनिर्भासि नितम्बबिम्बम्॥ ८ ॥

www.prapatti.com

आवर्तगर्तोज्वल नाभि चक्रं अत्यायतोरस्थलदीप्यमानम्।
आजानु लम्ब्यायत वृत्त बाहुं अत्युन्नतांसं श्रितगूढजत्रुम्॥ ९ ॥

शङ्खप्रतिस्पर्धिसुजातकण्ठं शान्तोपमानायितकर्णपाशम्।
सुस्निग्धबद्धस्मितचूतपोत नव्यप्रवालोपमिताधरोष्टम्॥ १० ॥

सुनिर्मलोदञ्चितमौक्तिकाली जडीकृतप्रौढिमदन्तपङ्क्तिम्।
विकासिनासापुटकान्तिशान्त प्रफुल्लतिल्यप्रसवावलेपम्॥ ११ ॥

नासालसत् कल्पलता प्रसून युगायिताम्भोरुहचारुनेत्रम्।
तत्सौरभाघ्राणविनिश्चलालि द्वयोपमभ्रूयुगळाभिरामम्॥ १२ ॥

सुजात चरणाम्बुजं सुदृढगुल्फ जानूरुकं
सितान्तरकटीतटं सुभगनाभिवक्षोगळम्।
सुदीर्घयुगबाहुकं शुभकपोलनासाक्षिकं
मनोरुचिरमालिकं कलय वेङ्कटेशं गुरुम्॥ १३ ॥

रथाङ्गजलजाङ्कितः सुललितोर्ध्वपुण्ड्रोज्ज्वलः
सरोजतुलसीमणिग्रथितमालिकाभूषणः।
सितांशुकयुगाञ्चितः स्मितमुखो दयाशीतलः
चकास्तु हृदि मे सदा स गुरुवेङ्कटाधीश्वरः॥ १४ ॥

य इमां दिनचर्यां च विग्रहध्यानपद्धतिम्।
वरदार्यकृतां भक्त्या शीलयेत् मुक्त एव सः॥ १५ ॥

॥ इति श्रीमद्वेदान्तदेशिक विग्रहध्यानम् समाप्तम् ॥

www.prapatti.com